**CBSE कक्षा - 9 संस्कृत**
**एनसीईआरटी प्रश्न-उत्तर**
**पाठः - 3 सोमप्रभम्**

**अभ्यास**

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-**
   i. **अध्यापिका सोमप्रभां कक्षायाः किमर्थं निष्कासितवती?**
   ii. **विद्यालयात् गृहम् आगत्य सा (सोमप्रभा) किम् अपश्यत्?**
   iii. **विमलायाः श्वसुरः श्वश्रूः च ताम् कुत्र किमर्थञ्च नयतः?**
   iv. **सोमप्रभा कथम् मातुः त्राणम् अकरोत्?**
   v. **सोमप्रभायाः आयुः कति वर्षाणि आसीत्?**
   vi. **अस्मिन् नाटके पुरुषनिरीक्षकस्य (आरक्षिणः) कर्तव्यपरायणता वर्णिताऽस्ति भ्रष्टाचारपरायणता वा?**

   **उत्तराणि-**
   i. सोमप्रभायाः उपानहौ त्रुटितौ, पुस्तकमञ्जूषा च त्रुटिता। अतः अध्यापिका तां कक्षायाः निष्कासितवती।
   ii. विद्यालयात् गृहम् आगत्य सा (सोमप्रभा) अपश्यत् यत् पितामहः पितामही च (तस्याः मातरम्) विमलां मारयतः।
   iii. विमलायाः श्वसुरः श्वश्रूः च ताम् महानसं (पाकशालां) ज्वालयितुम् (च) नयतः।
   iv. सोमप्रभायाः आयुः पञ्चवर्षाणि आसीत्।
   v. अस्मिन् नाटके पुरुषनिरीक्षस्य (आरक्षिणः) कर्तव्यपरायणता वर्णिताऽस्ति।

2. **निम्नलिखितस्य श्लोकस्य आशयं हिन्दीभाषया आङ्ग्लभाषया वा लिखत-**

   **क्षणे-क्षणे प्रवर्धते धनाय हिंस्त्रताखलै-**
   **र्विलोप्यतेऽतिनिर्दयं च जन्तुभिर्मनुष्यता।**
   **विभाजितं जगद्द्विधा निहन्यते च घातकै-**
   **रतीव दैन्यमागताऽस्ति साधुता मनुष्यता।।**

   **उत्तराणि- आशय -** आशय यह है कि दहेज जैसी कुप्रथा की विकरालता अपनी पराकाष्ठा पर पहुँच चुकी है। मानवता हाहाकार कर रही है। अतः दहेज प्रथा की समाप्ति अपरिहार्य है।

3. **(क) अधोलिखितानां पदानां पर्यायपदं पाठात् चित्वा लिखत-**
   i. पुत्रवधूः - ............................
   ii. पदत्राणे - ............................
   iii. पाकशालाम् - ............................
   iv. शीघ्रं कुरु - ............................
   v. पात्राणि - ............................
   vi. हन्तुम् इच्छा - ............................

**उत्तराणि-**

i. स्नुषा
ii. उपानहौ
iii. महानसम्
iv. त्वरस्व
v. भाजनानि
vi. जिघांसा

**(ख) सन्धिं कुरुत-**

i. कलह + आडम्बरः - ............................
ii. प्रचलति + अत्र - ............................
iii. न + अस्ति - ............................
iv. प्रति + एव - ............................
v. मया + एतत् - ............................
vi. तत्र + एव - ............................

**उत्तराणि-**

i. कलहाडम्बरः
ii. प्रचलत्यत्र
iii. नास्ति
iv. प्रत्येव
v. मयैतत्
vi. तत्रैव

4. **उदाहरणमनुसृत्य प्रकृतिप्रत्ययसंयोगं कुरुत-**

**यथा-** आ + गम् + ल्यप् - आगत्य

सम् + पूज् + ल्यप् - सम्पूज्य

i. **अभि + गम् + ल्यप् - ............................**
ii. **वि + हा + ल्यप् - ............................**
iii. **निर् + गम् + ल्यप् - ............................**
iv. **वि + हस् + ल्यप् - ............................**
v. **प्र + क्लृप् (कृष्) + ल्यप् - ............................**
vi. **सम् + बुध् + ल्यप् - ............................**

**उत्तराणि-**

i. अभिगम्य/अभिगत्य
ii. विहाय

iii. निर्गत्य/निर्गम्य
iv. विहस्य
v. प्रकल्प्य/प्रकृष्य
vi. सम्बुध्य

5. **अधोलिखितेषु पदेषु उपसर्गपदं चिनुत-**
   i. **परिहीयते - ............................**
   ii. **सञ्जातः - ...........................**
   iii. **अधिक्षिपति - ............................**
   iv. **प्रत्युत्तरम् - ...........................**
   v. **प्रवर्धते - ............................**
   vi. **विलोप्यते - ...........................**
   vii. **उपचरामः - ............................**
   viii. **उद्धृतवती - ...........................**

   **उत्तराणि-**
   i. परि
   ii. सम्
   iii. अधि
   iv. प्रति
   v. प्र
   vi. वि
   vii. उप
   viii. उत्

6. **स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत-**
   i. **अद्य <u>विद्यालयम्</u> न गमिष्यामि।**
   ii. **<u>अनया दुष्टया</u> चायभाजनानि त्रोटितानि।**
   iii. **विमला <u>आत्मत्राणाय</u> प्रयतते।**
   iv. **त्वम् <u>सङ्कटात्</u> माम् उद्धृतवती।**
   v. **त्वम् <u>वेतनस्य</u> गर्वम् उद्वहसि।**

   **उत्तराणि-**
   i. अद्य <u>कुत्र</u> न गमिष्यामि।
   ii. <u>कया</u> चायभाजनानि त्रोटितानि।
   iii. विमला <u>किमर्थं</u> प्रयतते।
   iv. त्वम् <u>कस्मात्</u> माम् उद्धृतवती।

v. त्वम् <u>कस्य</u> गर्वम् उद्वहसि।

7. **घटनाक्रमानुसारं वाक्यानि पुनः लिखत -**

   i. **सोमप्रभा आरक्षिणः समीपम् अगच्छत्।**
   ii. **विमलायाः श्वश्रूः ताम् कटुवचनैः आक्षिपति।**
   iii. **सा आत्मत्राणाय प्रयत्नं करोति।**
   iv. **विमलायाः श्वश्रूः श्वसुरः च ताम् ज्वालयितुम् महानसं नयतः।**
   v. **पुरुषनिरीक्षकः सोमप्रभया सह आगच्छति तस्याः त्राणं करोति।**

   **उत्तराणि-**

   i. विमलायाः श्वश्रूः ताम् कटुवचनैः आक्षिपति।
   ii. विमलायाः श्वश्रूः श्वसुरः च ताम् ज्वालयितुम् महानसं नयतः।
   iii. सा आत्मत्राणाय प्रयत्नं करोति।
   iv. सोमप्रभा आरक्षिणः समीपम् अगच्छत्।
   v. पुरुषनिरीक्षकः सोमप्रभया सह आगच्छति तस्याः त्राणं करोति।